# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा-नवम्बर/दिसम्बर-२०१६

| | | |
|---|---|---|
| **कक्षा - शास्त्रीप्रथम, सेमेस्टर-१** | **प्रश्नपत्रम् - ५** | **गुणा: - ७०** |
| **विषय: - धर्मशास्त्रम्** | **कोड - CC-1.1.1** | **समय: - ०३-०६** |
| **दिनाङ्क: - ९.१२.२०१६** | **ग्रन्थ: - पाराशरस्मृति: ( अध्याय १ त: ६ )** | |

---

**प्रथमान्विति: ( युनिट - १ )**

**प्रश्न: १ कयोश्चिद् द्वयो: व्याख्यानात्मकमुत्तरं लिखत । ०८**

(१) *व्यासवाक्यावसानेषु मुनिमुख्य: पराशर: ।*
*धर्मस्य निर्णयं प्राह सूक्ष्मं स्थूलं च विस्तरात् ॥*

(२) *न कश्चिद् वेदकर्ता च वेदं स्मृत्वा चतुर्मुख: ।*
*तथैव धर्मान् स्मरति मनु: कल्पान्तरेऽन्तरे ॥*

(३) *तप: परं कृतयुगे त्रेतायां ज्ञानमुच्यते ।*
*द्वापरे यज्ञमेवाहुर्दानमेव कलौ युगे ॥*

**प्रश्न: २ अधोलिखितेषु एकस्य प्रबन्धात्मकमुत्तरं लिखत । ०८**

(१) *षट्कर्माणि ग्रन्थोक्तदिशा निरूपणीयानि ।*
(२) *कलियुगस्य विशेषता वर्णनीया ।*

**प्रश्न: ३ टिप्पणीद्वयं लिखत । ०४**

*(१) यते: कर्माणि ।* *(२) ब्रह्मचारिण: कर्तव्यानि ।*
*(३) वेदपाठिनां श्रेष्ठता ।* *(४) अतिथिदेवो भव ।*

**प्रश्न: ४ अधोलिखितेषु पञ्चानामुत्तराणि देयानि । ०५**

(१) *हिमशैलाग्रे किं वनं वर्तते ?*
(२) *व्यासस्य मातु: नाम किम् ?*
(३) *बदरिकाश्रमे कस्य निवास: ?*
(४) *सन्तुष्टहृदय: महामुनि: क: ?*
(५) *कलौ युगे कस्य प्रधानता ?*
(६) *कस्मिन् युगे कर्तारमुत्सृजेत् इति नियम: ?*
(७) *त्रेतायां कस्य प्रधानता आसीत् ?*

**द्वितीयान्विति: ( युनिट - २ )**

**प्रश्न: ५ कयोश्चिद् द्वयो: व्याख्या कार्या । ०८**

(१) *उपासने तु विप्राणामङ्गशुद्धिश्च जायते ।*
*ब्राह्मणानां प्रसूतौ तु देहस्पर्शो विधीयते ॥*

(२) *अजादन्ता बाला ये ये च गर्भाद्विनि:सृता ।*
*तेषामग्निसंस्कारो न शौचं नोदकक्रिया ॥*

(३) *ब्रह्मचारी गृहे येषां हूयते च हुताशन: ।*
*सम्पर्कं चेन्न कुर्वन्ति न तेषां सूतकं भवेत् ॥*

**प्रश्नः ६** **एकस्य विस्तरेण उत्तरं लिखत ।** **०८**

(१) *क्षत्रियो हि प्रजा रक्षञ्छस्त्रपाणिः प्रदण्डवान् ।*

(२) *शूद्रस्य द्विज-शुश्रूषा परमो धर्म उच्यते ।*

**प्रश्नः ७** **एकस्य टिप्पणी लेख्या ।** **०२**

*(१) ब्राह्मणानां माहात्म्यम् ।* *(२) क्षत्रियाणां कर्माणि ।*

**प्रश्नः ८** **अधोलिखितेषु द्वयोरूत्तरे देये ।** **०२**

*(१) कृषिकर्मणि कः महादोषमाप्नुयात् ?*

*(२) ''द्विगवम्'' पदस्य कोऽर्थः ?*

*(३) शूद्रस्य किं कर्म ?*

## तृतीयान्वितिः ( युनिट - ३ )

**प्रश्नः ९** **द्वयोः व्याख्यानात्मकमुत्तरं लिखत ।** **०८**

(१) *असद्ब्राह्मणके ग्रामे शुना दष्टो द्विजोत्तमः ।*
*वृषं प्रदक्षिणीकृत्य सद्यः स्नात्वा शुचिर्भवेत् ॥*

(२) *क्षत्रियेणापि वैश्येन शूद्रेणैवेतरेण च ।*
*चाण्डालस्य वधे प्राप्ते कृच्छ्रार्द्धेन विशुद्ध्यति ॥*

(३) *स एव नियमो ग्राह्यो यमेकोऽपि वदेद् द्विजः ।*
*कुर्यात् वाक्यं द्विजानां तु अन्यथा भ्रूणहा भवेत् ॥*

**प्रश्नः १०** **एकस्य प्रबन्धात्मकमुत्तरं विस्तरेण लिखत ।** **०८**

(१) *शूद्रादीनां घातेन प्रायश्चित्तं निरूपयत ।*

(२) *चाण्डालेन सह वासकरणे शुद्धीकरणस्य निरूपणम् ।*

**प्रश्नः ११** **टिप्पणीद्वयं लिखत ।** **०४**

*(१) ''चाण्डालेन ब्राह्मणः हतः इत्यस्मिन् विषये अग्निसंस्कारस्य निरूपणम् ।*

*(२) चाण्डालस्य निवासभूमेः शुद्धीकरणम् ।*

*(३) द्विजातीनां प्रायश्चित्तकरणम् ।*

*(४) चान्द्रायणव्रतस्य प्रायश्चित्तम् ।*

**प्रश्नः १२** **अधोलिखितप्रश्नेषु पञ्चानामुत्तराणि देयानि ।** **०५**

*(१) पराशरस्मृतौ पञ्चमाध्याये कति श्लोकाः ?*

*(२) ''आहिताग्निर्द्विजः'' पदस्य कोऽर्थः ?*

*(३) मृन्मयस्य पात्रस्य केन माध्यमेन शुद्धिः ?*

*(४) चाण्डालैः सह सम्पर्के केन माध्यमेन शुद्धिः ?*

*(५) ''अच्छिद्रमस्तु'' इति वाक्यं के वदन्ति ?*

*(६) सर्वदेवमयः कः ?*

*(७) कैः सम्पादितं सम्पूर्णं तस्य तत्फलम् ?*

=०=